## चतुर्दशः पाठः

# कथं शब्दानुशासनं कर्तव्यम्

यह पाठ महर्षि पतञ्जलि विरचित महाभाष्य से उद्धृत है। इसमें शब्दों के अनुशासन का वर्णन किया गया है। इस पाठ में बताया गया है कि हमें कैसे शब्दों का उपदेश करना चाहिये। अर्थात् केवल शब्दों का उपदेश करना चाहिये, अथवा अपशब्दों का अथवा दोनों का। इसी का समाधान प्रस्तुत पाठ में पौराणिक आख्यानक के माध्यम से किया गया है।

**शब्दानुशासनमिदानीं कर्तव्यम्। किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति?**

**अन्यतरोपदेशेन कृतं स्यात्। तद्यथा-भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतत्- अतोऽन्येऽभक्ष्या इति॥**

**अभक्ष्यप्रतिषेधेन च भक्ष्यनियमः। तद्यथा- 'अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतत्-आरण्यो भक्ष्य इति॥**

**एवमिहापि।**

**यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् गाव्यादयोऽपशब्दा इति।**

**अथाप्यपशब्दोपदेशः क्रियेत, गाव्यादिषूपदिष्टेषु गम्यत एतत्-गौरित्येष शब्द इति॥**

**किं पुनरत्र ज्यायः?**

**लघुत्वाच्छशदोपदेशः। लघीयाञ्छब्दोपदेशः।**




**गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा-गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिका-इत्येवमादयोऽपभ्रंशाः।**

© NCERT not to be republished

**इष्टान्वाख्यानं खल्वपि भवति॥**

**अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः- गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्या?**

**नेत्याह। अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः॥ एवं हि श्रूयते-''बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम''॥ बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम।**

**किं पुनरद्यत्वे? यः सर्वथा चिरं जीवति वर्षशतं जीवति।**

**चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति-आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यगमकालेनैवायुः प्रर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः॥**

**कथं तर्हीमे शब्दाः प्रतिपत्तव्याः?**

**किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्॥**

**किं पुनस्तत्?**

**उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः॥**

**कथंजातीयकः पुनरुत्सर्गः कर्तव्यः कथंजातीयकोऽपवादः?**

**सामान्येनोत्सर्गः कर्तव्यः। तद्यथा-''कर्मण्यण्''।**

**तस्य विशेषेणापवादः। तद्यथा-''आतोऽनुपसर्गे कः''**

## शब्दार्थाः

| | | |
|---|---|---|
| **इदानीम्** | – | अधुना, अब। |
| **कर्त्तव्यम्** | – | कुर्यात्, करना चाहिए। |
| **शब्दोपदेशः** | – | शब्दकथनम्, शब्द कथन। |
| **अपशब्द** | – | अपकथनम्, अपशब्द कथन। |
| **अन्यतरः** | – | एकतरः, एक |
| **भक्ष्यम्** | – | खादनीयम्, खाने योग्य। |
| **उक्ते** | – | कथिते, कहने पर। |
| **आरण्यः** | – | वन्यः, वन के। |

© NCERT not to be republished

| | | |
|---|---|---|
| **ज्यायः** | – | श्रेष्ठः, श्रेष्ठ। |
| **आख्यानम्** | – | कथनम्, कथन। |
| **पठितव्याः** | – | पठेयुः, पढ़ने चाहिए। |
| **प्रतिपत्तौ** | – | ज्ञाने, जानने पर। |
| **अध्येता** | – | श्रोता, सुनने वाला। |
| **उपयुक्ता** | – | उपयोगिनी, उपयोगी। |
| **कृत्स्नम्** | – | सम्पूर्णम्, सारी। |
| **प्रतिपत्तव्याः** | – | ज्ञातव्याः, जानने चाहिए। |
| **औघान्** | – | समूहान्, समूह को। |
| **प्रतिपद्येरन्** | – | जानीयुः, जाना चाहिए। |

**टिप्पणीः**- कर्मण्यण् (पाणिनि सूत्र- 3-2-1)। उदाहरण- कुम्भकारः, कुम्भं करोति इति, कुम्भं √कृ अण्

आतोऽनुपसर्गे कः (पाणिनि सूत्र- 3-2-2)। उदाहरण- जलदः जलं ददाति इति, जलं √दा क

उपपद तत्पुरुष समास में धातु से सामान्यतया 'अण्' प्रत्यय होता है, किन्तु यदि धातु आकारान्त एवं उपसर्ग रहित है तो उससे 'क' प्रत्यय हो जाता है। इस प्रकार पहला सूत्र उत्सर्ग एवं दूसरा अपवाद है।

## अभ्यास

1. **संस्कृतभाषायाम् उत्तरत-**
   (क) मनुष्यस्य आयुः कति वर्षाणि मन्यते?
   (ख) कस्य नियमेन अभक्ष्यप्रतिषेधो गम्यते?
   (ग) गाम्कुक्कुटः भक्ष्यः अभक्ष्यः वा?
   (घ) कः ज्यायः अस्ति?
   (ङ) कः गरीयान् अस्ति?

2. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**
   (क) एकैकस्य शब्दस्य बहवः <u>अपभ्रंशा</u> सन्ति।
   (ख) <u>शब्दानां</u> प्रतिपत्तौ प्रतिपदपाठः कर्तव्य।
   (ग) <u>बृहस्पतिः</u> इन्द्राय प्रतिपदशब्दम् उक्तवान्।
   (घ) <u>चतुर्भिश्च</u> प्रकारैर्विद्योपयुक्ता भवति।

© NCERT not to be republished

(ङ) सामान्येन उत्सर्गः कर्तव्यः।

**3 विपरीतार्थैः सह मेलनं कुरुत-**

(क) भक्ष्यम् - तदानीम्
(ख) लघीयान् - अनिष्टान्
(ग) एकः - अभक्ष्यम्
(घ) इष्टान् - गरीयान्
(ङ) इदानीम् - बहवः

**4. अधोलिखितवाक्यानि पठित्वा शुद्धं वा अशुद्धं समक्षं लिखत-**

(क) अन्यतरोपदेशेन कृतं स्यात्।
(ख) इष्टान्वाख्यानं खल्वपि भवति।
(ग) यः सर्वथा चिरं जीवति वर्षशतं न जीवति।
(घ) चतुर्भिश्च प्रकारैर्विद्योपयुक्ता न भवति।
(ङ) आगमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्।

**5. शब्दानाम् अर्थं लिखित्वा वाक्येषु प्रयोगं कुरुत-**

(क) शब्दानुशासनम् - ..................
(ख) भक्ष्यम् - ..................
(ग) इदानीम् - ..................
(घ) चिरम् - ..................
(ङ) प्रवक्ता - ..................
(च) कृत्स्नम् - ..................

**6. रिक्तस्थानानि पूरयत-**

प्रतिपदपाठः कर्तव्यः, शब्दोपदेशाः, अपभ्रंशाः, अपशब्दोपैशाः, अभक्ष्यप्रतिषेधः, शब्दानुशासनम्

(क) इदानीं .................. कर्त्तव्यम्।
(ख) भक्ष्यनियमेन .................. गम्यते।
(ग) गरीयान् .................. ।
(घ) एकैकशब्दस्य बहवः .................. भवन्ति।
(ङ) लघुत्वात् .................. ।
(च) शब्दोपदेशे सति शब्दानां प्रतिपत्तौ .................. ।

© NCERT not to be republished

**7. उदाहरणानुसारं लिखत–**

यथा कर्त्तव्यः कृ+तव्यत्

(क) भक्ष्यः – ....................

(ख) उक्तः – ....................

(ग) कृतम् – ....................

(घ) उपयुक्ता – ....................

(ङ) उपदिष्टः – ....................

**8. सन्धिविच्छेदं कुरुत–**

| | | | |
|---|---|---|---|
| (क) शब्दोपदेशः | .............. | + | .............. |
| (ख) अन्येऽभक्ष्याः | .............. | + | .............. |
| (ग) गाव्यादिषूपदिष्टेषु | .............. | + | .............. |
| (घ) गौरिति | .............. | + | .............. |
| (ङ) लघुत्वाच्छब्दोपदेशः | .............. | + | .............. |
| (च) इष्टान्वाख्यानम् | .............. | + | .............. |
| (छ) पुनरत्र | .............. | + | .............. |
| (ज) अथैतस्मिन् | .............. | + | .............. |
| (झ) इत्येवम् | .............. | + | .............. |
| (ञ) प्रतिपदोक्तानाम् | .............. | + | .............. |

## योग्यताविस्तारः

अथ शब्दानुशासनम् पाणिनीयाष्टक का प्रथम सूत्र है। शब्दानुशासन अष्टाध्यायी की संज्ञा है और इसी को भाष्यकार पतञ्जलि ने 'शब्दानुशासनं नाम शास्त्रम्' से स्पष्ट की है। इसमें सर्वलोकप्रसिद्ध साधु शब्दों का अनुशासन है।

लौकिकव्यवहार में पद नियत नहीं होते परन्तु वेदवाक्यों में नियत होते हैं, वह बदले नहीं जा सकते। अतः लौकिक शब्दों को एक-एक करके स्वतन्त्र रूप में पढ़ दिया जाता है, पर वैदिक शब्दों को मन्त्रस्थ-क्रम-विशिष्ट ही पढ़ा जाता है।

पाणिनीय व्याकरण को 'त्रिमुनि व्याकरण' नाम से भी जाना जाता है। पाणिनि व्याकरण की परम्परा में पाणिनि, कात्यायन व पतञ्जलि के क्रमशः अष्टाध्यायी, वार्तिक एवं महाभाष्य प्रमुख एवं प्रामाणिक ग्रन्थ हैं। महर्षि पतञ्जलि का समय ई.पू. प्रथम माना जाता है।

© NCERT not to be republished